# Basnta Ritucharya

वसन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून्॥२२॥

च.सू.६

vasante nicitaḥ śleṣmā dinakṛdbhābhirīritaḥ|
kāyāgniṁ bādhate rogāṁstataḥ prakurute bahūn||22||

ca.sū.6

तस्माद्वसन्ते कर्माणि वमनादीनि कारयेत् ।
गुर्वम्लस्निग्धमधुरं दिवास्वप्नं च वर्जयेत् ॥२३ ॥

च.सू.६

tasmādvasante karmāṇi vamanādīni kārayet|
gurvamlasnigdhamadhuraṁ divāsvapnaṁ ca varjayet||23||

ca|sū|6

व्यायामोद्वर्तनं धूमं कवलग्रहमञ्जनम् ।
सुखाम्बुना शौचविधिं शीलयेत्कुसुमागमे ॥२४ ॥

च.सू.६

vyāyāmodvartanaṁ dhūmaṁ kavalagrahamañjanam|
sukhāmbunā śaucavidhiṁ śīlayetkusumāgame||24||

ca.sū.6

चन्दनागुरुदिग्धाङ्गो यवगोधूमभोजनः ।
शारभं शाशमैणेयं मांसं लावकपिञ्जलम् ॥२५ ॥

च.सू.६

candanāgurudigdhāṅgo yavagodhūmabhojanaḥ|
śārabhaṁ śāśamaiṇeyaṁ māṁsaṁ lāvakapiñjalam||25||

ca.sū.6

भक्षयेन्निर्गदं सीधु पिबेन्माध्वीकमेव वा ।
वसन्तेऽनुभवेत्स्त्रीणां काननानां च यौवनम् ॥२६ ॥

च.सू.६

bhakṣayennirgadaṁ sīdhu pibenmādhvīkameva vā|
vasante'nubhavetstrīṇāṁ kānanānāṁ ca yauvanam||26||

ca.sū.6